योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ००२

द्वितीयः सर्गः २

श्रीवसिष्ठ उवाच ।

अद्वैतैक्यं विमननं शान्तमात्मन्यवस्थितम् ।

यथा पङ्कमयं सैन्यं तथा शिवमयं जगत् ।। १

मनोहंकारबुद्ध्यादिचित्तमेव च तन्मयम् ।

कालाकारक्रियाशब्दशक्तिसंदर्भसंयुतम् ।। २

शिवपङ्कमया एव रूपालोकमनःक्रमाः ।

तन्मयत्वादनन्तत्वादतः किं केन चेत्यते ।। ३

मातृमेयप्रमाणादिदेशकालौ दिगादि च ।

भावाभावविवर्तादिशिवपङ्कमयात्मकम् ।। ४

अहंममेत्यतः सारान्नेतरत्परमेश्वरात् ।

असंसक्तमतिस्तिष्ठ हा शिलोदरमौनवत् ।। ५

श्रीराम उवाच ।

अहंममेत्यसद्रूपं ज्ञस्याभावयतः प्रभो ।

अशुभं कर्मणां त्यागादनुष्ठानाच्च किं शुभम् ।। ६

श्रीवसिष्ठ उवाच ।

पृच्छामि यदहं तत्त्वं कथयाशु ममानघ ।

यदि जानासि तत्त्वेन कर्म तावत्किमुच्यते ।। ७

विस्तारः कर्मणः कीदृङ् मूलं तस्य च किं भवेत् ।

नाशनीयं च निपुणं कथं कथय नाश्यते ।। ८

श्रीराम उवाच ।

यन्नाशनीयं निपुणं तन्नूनं च विनाश्यते ।

मूलकाषेण भगवन्न शाखादिविकर्तनैः ।। ९

शुभाशुभं नाशनीयं स्वकर्म खलु धीमता ।

मूलकाषविनाशेन तच्च नष्टं भवत्यलम् ।। १०

कर्मवृक्षस्य वक्ष्यामि ब्रह्मन्मूलानि मे श्रृणु ।

यन्निकाषेण निर्मूलो न स भूयः प्ररोहति ।। ११

देहस्तावदयं ब्रह्मन्कर्मवृक्षः समुत्थितः ।

रूढः संसारविपिने विचित्राङ्गलताञ्चितः ।। १२

कर्मबीजं तरोरस्य सुखदुःखफलावलेः ।

क्षणतारुण्यकान्तस्य जराकुसुमहासिनः ।। १३

मुहूर्तं प्रति कालोग्रमर्कटध्वंसिताकृतेः ।

निद्राहेमन्तजठरलीनस्वप्नदलोद्गतेः ।। १४

स्ववार्धकशरच्छान्तशीर्णेहापर्णसंततेः ।

जगज्जंगलजातस्य कलत्रोपतृणावलेः ।। १५

पल्लवावयवा हस्तपादपृष्ठादयोऽरुणाः ।

पत्राणि तनुवृत्तानि सुरेखाणि चलानि च ।। १६

अरुणाः पवनालोला मृद्व्यो मसृणमूर्तयः ।

स्नाय्वस्थिदिग्धसरसा अङ्गुल्यो बालपल्लवाः ।। १७

मृद्व्यो मसृणतीक्ष्णाग्रा वृत्ता रूढाः पुनःपुनः ।

द्वितीयेन्दुकलाकाराः कलिका नखपङ्क्तयः ।। १८

कर्मणः परिफुल्लस्य देहरूपतयेति हि ।

कर्मेन्द्रियाणि मूलानि दुष्टानि ग्रन्थिमन्ति च ।। १९

स्थिरास्थिग्रन्थिनद्धानि पङ्कमग्नात्मकानि च ।

वासनारसपीतानि निजरक्तरसानि च ।। २०

गुल्फवन्ति दृढाङ्गानि सुत्वञ्चि मसृणानि च ।

तेषामपि च मूलानि विद्धि बुद्धीन्द्रियाणि हि ।। २१

सुदूरमपि जातानि पञ्चस्तम्बानि तानि तु ।

वासनापङ्कमग्नानि रसवन्ति महान्ति च ।। २२

तेषां मूलं बृहत्स्तम्भं मनो व्याप्तजगत्त्रयम् ।

पञ्चस्रोतःशिराकृष्टमुक्तानन्तरसद्रवम्।। २३

तस्य मूलं विदुर्जीवं चेत्योन्मुखचिदात्मकम् ।

चेत्यस्य चेतनं मूलं सर्वमूलैककारणम् ।। २४

चितेस्तु ब्रह्म मूलं यत्तस्य मूलं न विद्यते ।

अनाख्यत्वादनन्तत्वाच्छुद्धत्वात्सत्यरूपिणः ।। २५

सर्वेषां कर्मणामेवं वेदनं बीजमुत्तमम् ।

स्वरूपं चेतयित्वान्तस्ततः स्पन्दः प्रवर्तते ।। २६

मुने चेतनमेवाद्यं कर्मणां बीजमुच्यते ।

तस्मिन्सति महाशाखो जायते देहशाल्मलिः ।। २७

एतच्चेतनशब्दार्थभावनावलितं यदि ।

तत्कर्म बीजतामेति नो चेत्सत्परमं पदम् ।। २८

चितिश्चेतनशब्दार्थभावनावलिता यदि ।

तत्कर्म बीजतामेति नो चेदाद्यं परं पदम् ।। २९

तस्माद्वेदनमेवेह कर्म कारणमाकृतेः ।

यदेतत्कर्मणां प्रोक्तं त्वयैवोक्तं मुनीश्वर ।। ३०

श्रीवसिष्ठ उवाच ।

अस्य राघव सूक्ष्मस्य कर्मणो वेदनात्मनः ।

कस्त्यागः किमनुष्ठानं यावद्देहमिति स्थितम् ।। ३१

यच्चेत्यते नु तेनाशु बहिरन्तश्च भूयते ।

सत्याकारमसत्यं वा भवत्वाहितविभ्रमम् ।। ३२

न चेत्यते चेत्तदलं भ्रमादस्माद्विमुच्यते ।

भ्रमः सत्योऽस्त्वसत्यो वा किं विचारणयानया।। ३३

एतच्चेतनमेवान्तर्विकसत्युद्भवभ्रमैः ।

वासनेच्छामनःकर्मसंकल्पाद्यभिधात्मभिः ।। ३४

प्रबुद्धस्याप्रबुद्धस्य देहिनो देहगेहके ।

आदेहं विद्यते चित्तं त्यागस्तस्य न विद्यते ।। ३५

जीवतां तस्य संत्यागः कथं नामोपपद्यते ।

केवलं कर्मशब्दार्थभावनाभावने सति ।। ३६

कर्माकर्मत्वमुत्सृज्य स्वयमेव भवत्यजम् ।

असंभवति संत्यागे कर्मणो यः करोति हि ।। ३७

इदं कर्तव्यतात्यागं न किंचित्तेन तत्कृतम् ।

बोधादिदंतासंवित्तेः स्वयं विलयनात्तु यत् ।। ३८

जगतस्तं विदुस्त्यागमसङ्गं मोक्षमेव च ।

वेदनं सति संवेद्ये सर्गादावेव वेद्यदृक् ।। ३९

नोत्पन्ना विद्यते नैव तस्मात्किं क्वेव वेदनम् ।

वेद्योन्मुखत्वं संत्यज्य रूपं यद्वेदनस्य वै ।। ४०

न वेदनं तन्नो कर्म तच्छान्तं ब्रह्म कथ्यते ।

चेतनं प्रोच्यते कर्म संसृत्याभ्रविकासितम् ।। ४१

अचेतनं विदुर्मोक्षं ज्ञं प्रत्येवोपदेशगीः ।

त्यागो हि कर्मणां तस्मादादेहं नोपपद्यते ।। ४२

यैस्तु संपूज्यते कर्म तन्मूलं तैर्न मुच्यते ।

मूलं स्वकर्मणः संविन्मनसो वासनात्मनः ।। ४३

सा चादेहं समुच्छेत्तुमृते बोधान्न शक्यते ।

राम केवलमेषान्तः कर्ममूलकरा परा ।। ४४

सूक्ष्मसंविदसंवित्त्या स्वयत्नेन निकृन्त्यते ।

येन संविदसंवित्त्या स्वयत्नेन विचार्यते ।। ४५

तेन संसृतिवृक्षस्य मूलकाषो वितन्यते ।। ४६

अचेतनाकाशमनन्यदेकं

तदेवमस्ति त्विदमर्थहीनम् ।

तद्व्योमरूपं यत एतदेवं

निरामयं चेतनसारमाहुः ।। ४७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षो० निर्वाणप्रकरणे उत्तरार्धे कर्मबीजदाहयोगोपदेशो नाम

द्वितीयः सर्गः ।। २ ।।